## हनः सिच्। (१४/२६९७)

हन्तेर्धातोः परः सिच् किद् भवति[1]। आहत, [2]आहसाताम्, आहसत। सिचः कित्त्वादनुनासिकलोपः (६.४.३७/२४२८)। सिज्ग्रहणं लिङ[3]निवृत्त्यर्थम्। उत्तरत्रानुवृत्तिर्मा भूत्[4]। आत्मनेपदग्रहणमुत्तरार्थमनुवर्तते। इह तु [5]परस्मैपदे हन्तेर्वधभावस्य [6]नित्यत्वात् कित्त्वस्य प्रयोजनं नास्ति ॥

## यमो गन्धने। (१५/२६९८)

[7]सिच आत्मनेपदेषु इति वर्तते। यमेर्धातोर्गन्धने वर्तमानात् परः सिच्[8]प्रत्ययः किद् भवति आत्मनेपदेषु परतः। गन्धनं सूचनं, [9]परेण प्रच्छाद्यमानस्या[10]वद्यस्याविष्करणम्[11]। अनेकार्थत्वाद् धातूनां यमिस्तत्र वर्तते। उदायत, उदायसाताम्, उदायसत। सूचितवान् इत्यर्थः। सिचः कित्त्वादनुनासिकलोपः (६.४.३७/२४२८)। 'आङो यमहनः' (१.३.२८/२६९५) इत्यात्मनेपदम्। गन्धन इति किम्? [12]उदायंस्त पादम्। उदायंस्त कूपाद् [13]उदकम्। [14]उध्दृतवान् इत्यर्थः। सकर्मकत्वेऽपि 'समुदाङ्भ्यो यमोऽग्रन्थे' (१.३.७५/२७४२) इत्यात्मनेपदम् ॥

## विभाषोपयमने। (१६/२७३०)

यमः सिजात्मनेपदेषु इति वर्तते। यमे[15]र्धातोः उपयमने वर्तमानात् परः [16]सिच्प्रत्ययो विभाषा किद् भवति आत्मनेपदेषु परतः। उपायत कन्याम्, उपायंस्त कन्याम्। [17]उपायत भार्याम्, उपायंस्त भार्याम्। उपयमनं [18]स्वीकरणं, विवाहः, दारकर्म, पाणिग्रहणम् [19]इत्यर्थः। 'उपाद्यमः [20]स्वकरणे' (१.३.५६/२७२९) इत्यात्मनेपदम् ॥

## स्थाघ्वोरिच्च। (१७/२३८९)

सिजात्मनेपदेषु इति [21]वर्तते। तिष्ठतेर्धातोः घुसञ्ज्ञकानां च इकारश्चा[22]न्तादेशः सिच्च[23] किद् भवति आत्मनेपदेषु परतः। उपास्थित, उपास्थिषाताम्, उपास्थिषत। घुसञ्ज्ञकानाम्—[24]अदित। अधित।

इच्च [25]कस्य तकारेत्वं [26]दीर्घो मा भूदृतेऽपि सः।
[27]अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः ॥ (म. भा. १.१९९)

## न क्त्वा सेट्। (१८/३३२२)

क्त्वा प्रत्ययः सेण् न किद् भवति। देवित्वा। [28]वर्तित्वा। सेट् इति किम्? कृत्वा। [29]हुत्वा। [30]क्त्वाग्रहणं किम्? निगृहीतिः (का.सं.२०.५)। उपस्निहितिः। निकुचितिः।

---

1. आत्मनेपदेषु परतः इत्यधिकम् ह. 2. आहसतां ह. 3. लिङो फ. 4. इति इत्यधिकम् फ, मा भूय इति ह 5. परस्मैपदेषु अ.ड.ह. 6. ङित्त्वात् फ. 7. सिचः अ.ब.इ.ग. 8. प्रत्ययः नास्ति क.ड.फ.ह. 9. परेण–आविष्करणम् नास्ति फ. 10. अर्थस्य इत्यधिकम् ह. 11. इत्यर्थः इत्यधिकम् ग. 12. आयंस्त फ.ह. 13. रज्जुम् अ.क.ड.फ.ग.ह. 14. नास्ति फ. 15. धातोः नास्ति ह. 16. सिज् वा ग, सिअसपो ब. 17. उदाहरणमिदं नास्ति फ. 18. स्वीकरणे ब, स्वीकारः ड. ह. 19. इति यावत् ग. 20. स्वीकरणं क. 21. अनुवर्तते ग. 22. अन्त्यादेशः फ. ह. 23. च नास्ति फ. 24. आदित ग. फ, आधित फ, आदिषाताम् आदिषत। आधिषाताम् आधिषत ह. 25. कारस्य क. 26. दीर्घो नास्ति क. 27. अनन्तप्लुतो अ. क. 28. वर्धित्वा क. ह, सेवित्वा क. ड. फ. ग. ह. 29. हुत्वा क. ड. ग. ह. फ. 30. क्त्वेति किम्? ग, क्त्वाग्रहणे ब.